रु.न.२८

र-स्तो.न

संस्कृत

शिवापराधःस्तोत्रं

६७८/स्तो. २१५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥इत्तिशिवापराधस्तोत्रेप्रारंभः॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

श्रीगणेशायनमः॥ आदौकर्मप्रसंगात्कलयतिकलुषंमातृकुक्षौ
(२) स्थितःसन्॥ तन्मूत्रमेदमध्ये क्वथयतिनितरांजाठरोजातवेदः॥
यद्यद्वातत्रदुःखंव्यथयतिनितरांशक्यतेकेनवक्तुं॥ क्षंतव्योमेप
राधःशिवशिवशिवभोश्रीमहादेवशंभो॥१॥ बाल्येदुःखातिरेको
मलुलितवपुस्तन्यपानेपिपासा॥ नोशक्यंचेंद्रियेभ्योभवगु
णजनिताजंतवोमांतुदंति॥ नानारोगोत्थदुःखाद्रुदनपरव
शःशंकरंनस्मरामि॥ क्षंतव्योमे०॥२॥ प्रौढोहंयौवनस्थोविष
यविषधरैःपंचभिर्मर्मसंधौ॥ दष्टोनष्टोविवेकःसुतधनयु १

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

नैवदृष्टं कदाचित्॥ क्षंतव्यो मे०॥६॥ नग्नो निःशंकशुद्धस्त्रिगुणविरहितो
(2A) ध्वस्तमोहांधकारो॥ नासाग्रेन्यस्तदृष्टिर्विगतभवभयो नैवदृष्टं कदाचि
त्॥ उन्मन्यावस्थया त्वां विगतकलिमलं शंकरं नस्मरामि॥ क्षंतव्यो
मे०॥७॥ स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गांगतोयं॥ पू
जार्थं वा कदाचिद्बहुतरगहनं खंडबिल्वीदलानि॥ नानीता पद्म
मालासरसिविकसिता गंधधूपैः त्वदर्थं॥ क्षंतव्यो मे०॥८॥ ध्यात्वा तु
चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजोभ्यो॥ हव्यं ते लक्षसंख्यं
हुतवहवदने नार्पितं बीजमंत्रैः॥ नोतप्तं गांगतीरे व्रतपरिचरणै रुद्र २
जाप्यैन देवं॥ क्षंतव्यो मे०॥९॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3) वतिस्वादुसौख्येनिषण्णः ॥ शैवीचिंताव्यतीताममहृदयमहोमा
नगर्वाधिरूढो ॥ क्षंतव्यो मे० ॥ ३ ॥ नो शक्यंस्मार्तकर्मप्रतिपदग
हनंप्रत्यवायाकुलाख्यं ॥ श्रौतेवार्ताकथंमेद्विजकुलविहितेब्र
ह्ममार्गेस्वसारे ॥ ज्ञातोधर्मोविचारःश्रवणमननयोःकोनिदिध्यासि
तव्यं ॥ क्षंतव्यो मे० ॥ ४ ॥ वार्धिक्येचेंद्रियाणांविगतगतिमतेश्चाधि
दैवाधितापैः ॥ पापैरोगैर्वियोगैस्त्वनवसितवपुषःप्रौढहीनंचदीनं ॥
मिथ्यामोहाभिलाषैर्भ्रमतिममनोधूर्जटेध्यानशून्यं ॥ क्षंतव्यो मे० ॥ ५ ॥
स्थित्वास्थानेसरोजेप्रणवमयमरुत्कुंभितेब्रह्मरंध्रे ॥ स्वांतेशांतेप्रली
नेप्रस्फुटितगहनेज्योतिरूपेपराख्ये ॥ लिंगज्ञेब्रह्मवाच्यंसकलसुरनतं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A) तैः स्नापितं नैव लिंगं ॥ नो लिप्तं चंदनाद्यैः कनकविरचितैः भूषणैर्न
प्रसूनैः ॥ धूपैः कर्पूरदिपैर्विविधरसयुतैर्नैव भक्षोपहारैः ॥
२ क्षंतव्यो मे० ॥ ७ ॥ करचरणकृतं वाक्कायजं कर्मजं वा ॥ श्रवणनयन
जं वा मानसं वापराधं ॥ विहितमविहितं वा सर्वमेतत्क्षमस्व ॥ जय
जय करुणाब्धे श्रीमहादेव शंभो ॥ ११ ॥ चंद्रोद्भासितशेखरे
स्मरहरे गंगाधरे शंकरे ॥ सर्पैर्भूषितकंठकर्णविवरे नेत्रोत्थवैश्वा
नरे ॥ दंतित्वक्कृतसुंदरांबरधरे त्रैलोक्यसारे हरे ॥ मोक्षार्थं कुरु
चित्तवृत्तिममलामन्यैस्तु किं कर्मभिः ॥ १२ ॥ किं वानेन धनेन वाजि

(3)

करिभिः ग्रामेन राज्येन किं ।। किं वा मित्रकलत्रपुत्रपशुभिर्देहेन गेहे

न किं ।। स्यज्ञात्वैतत्क्षणभंगुरं सपदि रे त्याज्यं मनो दुरितं ।। स्वात्मस्थं गु

रुवाक्यतो भज भज: श्रीपार्वतिवल्लभं ।। १३ ।। आयुर्नश्यति पश्यतां प्रति

दिनं याति क्षयं यौवनं ।। प्रत्यायांति गता: पुनर्न दिवसा कालो जगद्भ

क्षका ।। लक्ष्मी स्तोयतरंग भंग चपला विद्युच्चलं जीवितं ।। तस्मा

न्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना: ।। १४ ।। इति श्रीमत्परम ३

हंस श्री परिव्राजिकाचार्य श्रीमत्संकराचार्य विरचितं शिवा

अपराधस्तोत्रं संपूर्णं ।। छ ।। छ ।। छ ।। छ ।। छ ।।

A joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

# मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com